# बोर्ड कृतिपत्रिका : फेब्रुवारी 2025

## आनन्द : (संयुक्त - संस्कृतम्)

**Time: 2 Hours** **Marks: 40**


**सूचना :**


(1) सूचनानुसारेण् आकृतयः आरेखितव्याः।
(2) आकृतीनाम् आरेखनं मसीलेखन्या अङ्कलेखन्या वा कर्तव्यम्।
(3) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
(4) लेखनं सुवाच्यं, स्पष्टं लेखननियमानुसारं च भवेत्।


### प्रथमः विभागः – सुगमसंस्कृतम् (6)

1. (अ) **चित्रं दृष्ट्वा नामानि लिखत। (4 तः 3)** [3]

(1)


(2)



(3)


(4)



(आ) **सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2)** [2]

(1) ८ (2) द्वात्रिंशत्। (3) ९९

(इ) **समय-स्तम्भमेलनं कुरुत।** [1]

| 'अ' | 'आ' |
|---|---|
| (1) द्वादशवादनम् | १०.०० |
| (2) पादोन-त्रिवादनम् | १२.०० |
| | २.४५ |

### द्वितीयः विभागः – गद्यम् (14)

2. (अ) **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [4]

भूपालः पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट्। प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत्। राज्याभिषेकसमये चारणाः पृथुनृपस्य स्तुतिं गातुमुत्सुकाः। तदा पृथुः आज्ञापयत्, "तिष्ठन्तु चारणाः! यावत् मम सद्गुणाः न प्रकटीभवन्ति तावदहं न स्तोतव्यः। स्तवनं तु ईश्वरस्यैव भवेत्।" स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः अभवन्।

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत्। भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च। ताः प्रजाः पशुवज्जीवन्ति। निकृष्टान्नं खादन्ति। तद् दृष्ट्वा राजा चिन्ताकुलः जातः। तदा पुरोहितोऽवदत्, "हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते। तत्प्राप्तुं यतस्व।"

Target Publications

**(1) अवबोधनम्। (3 त: 2)** **2**

**(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत:** 1

पृथुवैन्य: स्वप्रजा: दृष्ट्वा चिन्ताकुल: जात: यत: ...............

१) तस्य प्रजाजना: परस्परं वादविवादं कुर्वन्ति।

२) तस्य प्रजाजना: पशुवत् जीवन्ति।

**(ख) क: कं वदित ?** 1

"तत्प्राप्तुं यतस्व।"

**(ग) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।** 1

राजा स्वराज्ये भ्रमणम् अकरोत्।

**(2) शब्दज्ञानम्। (3 त: 2)** **2**

**(क) गद्यांशात् 2 सप्तमी-विभक्त्यन्तपदे चित्वा लिखत।** 1

**(ख) गद्यांशात् विशेषण-विशेष्ययो: मेलनं कुरुत।** 1

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (1) | कृशा: | चारणा: |
| (2) | प्रसन्ना: | प्रजा: |
| | | स्तुतिगायका: |

**(ग) पूर्वपदम् / उत्तरपदं लिखत।** 1

(1) अशक्ताश्च = ............... + च।

(2) ईश्वरस्यैव = ईश्वरस्य + ...............।

**(आ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** [4]

अर्णव: - द्रव्यस्य अन्तिम: घटक: मूलं तत्त्वं च परमाणु:, सत्यं खलु ?

पिता - सत्यम्, अयं खलु कणादमहर्षे: सिद्धान्त:। अपि जानासि? परमाणु: द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम्। तदपि प्राय: ख्रिस्तपूर्व पञ्चमे षष्ठे वा शतके।

अर्णव: - तात, महर्षिणा कणादेन किं किम् उक्तं परमाणुविषये? वयं तु केवलं तस्य महाभागस्य नामधेयम्, एव जानीम:।

पिता - कणादमुनिना प्रतिपादितम् - परमाणु: अतीन्द्रिय:, सूक्ष्म:, निरवयव:, नित्य:, स्वयं व्यावर्तक: च। 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणो: व्याख्या कृता।

अर्णव: - का सा व्याख्या?

पिता - जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रज:।
तस्य षष्ठतमो भाग: परमाणु: स उच्यते।।

**(1) अवबोधनम्। (3 त: 2)** **2**

**(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** 1

(1) रजस: ............... भाग: परमाणु:। (षष्ठतम:/शततम:)


(2) ............... द्रव्यस्य मूलकारणम्। (परमाणु: / विज्ञानं)

**(ख) पूर्णवाक्येन उत्तरं लिखत ।** 1

परमाणुसिद्धान्त: केन महर्षिणा कथित:?

**(ग) एष: गद्यांश: कस्मात् उद्धृत:?** 1

**(2) जालरेखाचित्रं पूरयत ।** 2




**(इ) गद्यांशं पठित्वा सरलार्थं लिखत। (2 त : 1)** [4]

(1)

| | | |
|---|---|---|
| नदी (शुतुद्री) | - | विप्रवर, मधुरा खलु ते वाणी। रञ्जयति अस्मान्। वद कथं तव साहाय्यं कर्तव्यम्? |
| विश्वामित्र : | - | अम्ब, शृणु मे अभ्यर्थनाम्। गाधा मे भविष्यसि? स्वल्पीभवतु जलौघ :। येन वयं सुखेनैव परतीरं प्राप्तुं शक्नुम :। |

(2)

| | | |
|---|---|---|
| वैखानस : | - | राजन्! समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपते : अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेय : सत्कार :। |
| दुष्यन्त : | - | तपोवननिवासिनामुपरोधो मा भूत्। अत्रैव रथं स्थापय यावदवतरामि। |

**(ई) माध्यमभाषया उत्तरं लिखत। (2 त : 1)** [2]

(1) शङ्करेण संन्यासार्थं कथम् अनुमति : लब्धा?

(2) 'स नर : शत्रुनन्दन :' इति वचनं कथाया : आधारेण स्पष्टीकुरुत।

## तृतीय : विभाग :- पद्यम्। (10)

**3. (अ) पद्यांशं पठित्वा निर्दिष्टा : कृती : कुरुत। (5 त : 4)** [4]

कं संजघान कृष्ण : का शीतलवाहिनी गङ्गा।
के दारपोषणरता : कं बलवन्तं न बाधते शीतम्।।

वृथाभ्रमणकुक्रीडापरपीडापभाषणै :।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्।।

आत्मनो मुखदोषेण बध्यन्ते शुकसारिका :।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम्।।

यथैव सकला नद्य : प्रविशन्ति महोदधिम्।
तथा मानवताधर्मं सर्वे धर्मा : समाश्रिता :।।

**(क) पूर्णवाक्येन उत्तरं लिखत।** 1


कृष्ण : कं जघान?

Target Publications

(ख) **विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (1) | सर्वे | नद्यः |
| (2) | सकलाः | महोदधिम् |
| | | धर्माः |

(ग) **जालरेखाचित्रं पूरयत।** 1




(घ) **पद्यांशात् 2 द्वितीयाविभक्त्यन्तपदे चित्वा लिखत।** 1

(च) **पूर्वपदम्/उत्तरपदं लिखत।** 1

(1) आत्मनो मुखदोषेण = ........................ + मुखदोषेण।

(2) यथैव = यथा + ........................।

(आ) **पद्ये शुद्धे पूर्णे च लिखत। (3 तः 2)** [4]

(1) तावद् भयाद्धि ..........................................।
.................................................... यथोचितम्।।

(2) अल्पानामपि ..........................................।
.................................................... मत्तदन्तिनः।।

(3) यथा चतुर्भिः ..........................................।
.................................................... गुणेन कर्मणा।।

(इ) **माध्यमभाषया सरलार्थं लिखत। (2 तः 1)** [2]

(1) सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम्।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च।।

(2) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम्।।

## चतुर्थः विभागः- भाषाभ्यासः। (10)

4. (अ) **पृथक्करणम्।** [4]

(1) **मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरुत। (5 तः 4)** 2

| नाम | सर्वनाम |
|---|---|
| | |

(**मञ्जूषा** – के, जम्बूकः, भारतस्य, तस्मात्, येन)

Target Publications

(2) **मञ्जूषात: क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत। (5 त : 4)** 2

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

(**मञ्जूषा** – गच्छतु, भेतव्यम्, मुक्त:, प्रार्थयत, निवसति)

(आ) **निर्दिष्टा: कृती: कुरुत। (4 त : 2)** [4]

**(1) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (3 त : 2)** 2

(क) भगवता व्यासेन ........................................ पुराणानि रचितानि। (अष्टादश/अष्टदश:)

(ख) आर्यभट्ट: इति भारतवर्षेण प्रेषित: ...................... उपग्रह:। (प्रथम:/एकस्मिन्)

(ग) दिनस्य ...................... लोकयानम् आगच्छति । (नववारं/नवम्)

**(2) समासविग्रहाणां समासनामभि: सह मेलनं कुरुत। (6 त : 4)** 2

| समासविग्रह: | समासनाम |
|---|---|
| (1) न परिचित: । | तृतीया-तत्पुरुष:। |
| (2) विद्यया विहीन:। | कर्मधारय: । |
| (3) रामस्य अभिषेक:। | नञ्-तत्पुरुष:। |
| (4) पूर्णा नाम नदी। | बहुव्रीहि:। |
| (5) अल्पा धी: यस्य स:। | इतरेतर-द्वन्द्व:। |
| (6) शुका: च सारिका: च। | षष्ठी-तत्पुरुष:। |

**(3) मञ्जूषात: समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत।** 2

(**मञ्जूषा** – पृष्ठत:, मग्न:, चारित्र्यम्, न्यूनम्)

(1) शीलम् = .........................। (2) प्रभूतम् × .........................।

(3) रत: = .........................। (4) पुरत: × .........................।

**(4) योग्यं पर्यायं चिनुत। (3 त : 2)** 2

(1) धीरा: न्याय्यात्पथ: पदं न प्रविचलन्ति। (कर्तृवाच्यम्/कर्मवाच्यम्)

(2) त्वम् इदानीमेव संन्यासं ................... । (स्वीकरोतु/स्वीकुरु)

(3) .................. पुरुषं तु मित्राणि अपि त्यजन्ति। (निर्धन:/निर्धनं)

(इ) **विशिष्ट-विभक्ते: उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (4 त : 2)** [2]

(क) दा (1 प. प./3 उ. प.) (ख) विना

(ग) स्निह् (4 प.प.) (घ) नम:

Target Publications